अथ अमृत्संजीविनी मन्त्रः :–

**''मूलेन च न्यासं कुर्यात्, त्रिचतुश्चैककं पुनः। षट्चतुर्द्विककेनैव षडंगानि समाचरेत्।।''**
(अर्थात् 1 ह्रीं हंसः, 2 संजीवनी, 3 जूं, 4 जीवं प्राणग्रन्थिं = हंसः कुरु कुरु, 5 कुरु सौः सौः, 6 स्वाहा।)

विधिः –
**अस्यामृत्संजीवनीमन्त्रस्य शुक्र ऋषिः, गायत्री छन्दः, अमृत्संजीविनीदेवी देवता, ह्रीं बीजं, स्वाहा श क्तिः, हंसः कीलकं, सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः।।**

अथ ऋष्यादि न्यासः –
**ॐ शुक्र ऋषये नमः** – शिरसि, **ॐ गायत्री छन्दसे नमः** – मुखे, **ॐ अमृत्संजीविनीदेवी देवतायै नमः** – हृदये, **ॐ ह्रीं बीजाय नमः** – गुह्ये, **ॐ स्वाहा शक्तये नमः** – पादयोः, **ॐ हंसः कीलकाय नमः** – नाभौ, **ॐ सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगाय नमः** – सर्वाङ्गे।।

अथ कर न्यासः –
**ॐ ह्रीं हंसः – अंगुष्ठाभ्यां नमः, ॐ संजीविनी – तर्जनीभ्यां नमः, ॐ जूं – मध्यमाभ्यां नमः, ॐ हंसः कुरु कुरु – अनामिकाभ्यां नमः, ॐ कुरु सौः सौः – कनिष्ठिकाभ्यां नमः, ॐ स्वाहा – करतलकरपृष्ठाभ्यां नमः।।**

अथ हृदयादि न्यासः –
**ॐ ह्रीं हंसः – हृदयाय नमः, ॐ संजीविनी – शिरसे स्वाहा, ॐ जूं – शिखायै वषट्, ॐ हंसः कुरु कुरु – कवचाय हुम्, ॐ कुरु सौः सौः – नेत्रत्रयाय वौषट्, ॐ स्वाहा – अस्त्राय फट्।।**

**।।ॐ भूर्भुवःस्वरोमिति दिग्बन्धः।।**

अथ ध्यानम् –

**चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तस्थितम्।**
**मुद्रपाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्।।**
**कोटीन्दुप्रस्खलत्सुधाप्लुततनुं हारातिभूषोज्ज्वलम्।**
**कान्तं विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत्।।**

अथ मन्त्रः –

**''ॐ ह्रीं हंसः, संजीविनी, जूं , हंसः कुरु कुरु, कुरु सौः सौः, स्वाहा।''।1।,**

अथवा

**''ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।**
**त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनमुर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।।**
**ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।''।2।**

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

**अथ मृत्युञ्जयस्तोत्रम् -**

**अस्य मृत्युञ्जयस्तोत्रस्य मार्कण्डेय ऋषिः, अनुष्टुप्छन्दः, मृत्युञ्जयो देवता, हौं बीजं, जूं शक्तिः, सः कीलकं, सर्वरोगनिवृत्तिपूर्वकारोग्यप्राप्त्यर्थे सर्वाभीष्टसिद्ध्यर्थे च जपे विनियोगः।।**

अथ ऋष्यादि न्यासः -

**ॐ मार्कण्डेय ऋषये नमः** - शिरसि, **ॐ अनुष्टुप्छन्दसे नमः** - मुखे, **ॐ मृत्युञ्जयदेवताभ्यो नमः** - हृदये, **ॐ हौं बीजाय नमः**- गुह्ये, **ॐ जूं शक्तये नमः**- पादयोः, **ॐ सः कीलकाय नमः**- नाभौ, **ॐ सर्वरोगनिवृत्तिपूर्वकारोग्यप्राप्त्यर्थे सर्वाभीष्टसिद्ध्यर्थे च जपे विनियोगाय नमः** - सर्वाङ्गे।।

अथ कर न्यासः -

**ॐ हौं - अंगुष्ठाभ्यां नमः, ॐ जूं - तर्जनीभ्यां नमः, ॐ सः - मध्यमाभ्यां नमः, ॐ हौं - अनामिकाभ्यां नमः, ॐ जूं - कनिष्ठिकाभ्यां नमः, ॐ सः - करतलकरपृष्ठाभ्यां नमः।।**

अथ हृदयादि न्यासः -

**ॐ हौं - हृदयाय नमः, ॐ जूं - शिरसे स्वाहा, ॐ सः - शिखायै वषट्, ॐ हौं - कवचाय हुम्, ॐ जूं - नेत्रत्रयाय वौषट्, ॐ सः - अस्त्राय फट्।।**

**रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिं। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।1।।**
**नीलकण्ठं कलामूर्तिं कालघ्नं कलनाशनम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।2।।**
**नीलकण्ठं विरूपाक्षं निर्मलं विमनप्रदम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।3।।**
**वामदेवं महादेवं लोकनाथं जगद्गुरुम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।4।।**
**देवदेवं जगन्नाथं देवेशं वृषभध्वजम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।5।।**
**त्र्यक्षं चतुर्भुजं सन्तं जटामुकुटधारणम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।6।।**
**भस्मोद्धूलितसर्वाङ्गं नागाभरणभूषितम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।7।।**
**अनाथमव्ययं सन्तं अक्षमालाधरं हरम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।8।।**
**आनन्दं परमं नित्यं कैवल्यपदध्यायिनम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।9।।**
**अर्धनारीश्वरं देवं पार्वतीप्राणनायकम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।10।।**
**प्रलयस्थितिकर्तारं आदिकर्तारमीश्वरम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।11।।**
**व्योमकेशं विरूपाक्षं चन्द्रार्धकृतशेखरम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।12।।**
**गंगाधरं शशिधरं शंकरं शूलपाणिनम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।13।।**
**स्वर्गापवर्गदातारं सृष्टिस्थित्यन्तकारिणम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।14।।**
**कल्पायुर्देहि मे पुण्यं यावदायुररोगताम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।15।।**
**शिवेशानं महादेवं वामदेवं सदाशिवम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।16।।**
**उत्पत्तिस्थितिसंहार-कर्तारमीश्वरं गुरुम्। नमामि शिरसा देवं किं नो मृत्युः करिष्यति।।17।।**

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसन्निणौ। तस्य मृत्युभयं नास्ति नाग्निचोरभयं क्वचित्।18।।
शतावृत्तिं प्रकर्तव्यं संकटे कष्टनाशनम्। शुचिर्भूत्वा पठेत्स्तोत्रं सर्वसिद्धिप्रदायकम्।।19।।
मृम्युञ्जय महादेव त्राहि मां शरणागतम्। जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः।।20।।
तावकत्वाद् गतप्राणः तव चित्तोऽहं सदा मृड। इति विज्ञाप्य देवेशं त्र्यम्बकाख्यं जपेदिदम्।।21।।
नमः शिवाय साम्बाय हरये परमात्मने। प्रणतक्लेशनाशाय योगीनां पतये नमः।।22।।

।। इति मार्कण्डेयपुराणोक्तं मृत्युञ्जयस्तोत्रं संपूर्णम्।।

स्तोत्र पाठ के बाद इस मन्त्र का कम से कम एक माला जपे –

''नमः शिवाय साम्बाय हरये परमात्मने। प्रणतक्लेशनाशाय योगीनां पतये नमः।।''

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM